श्रीः

श्रीमते रामानुजाय नमः

(साहित्यरत्नं श्री उवे जग्गू वेंकटाचार्यविरचितं)

# ।।श्री भारतकृष्णमंगळं।।

आदि-पर्व

अनुग्रहाय भक्तानां तद्द्विषां निग्रहाय च
अवतीर्णाय भूभागे वासुदेवाय मंगळं ।। १
आजान क्लेश मग्नास्ते कौंतेया यत्प्रसादतः
कृष्णां राज्यं सुखं चापु स्तस्मै कृष्णाय मंगळं ।। २

सभा-पर्व

सर्वकर्म समाराध्य स्तद्विघ्न विनिवर्तकः
भक्तांघ्रि शोधको यश्च तस्मै कृष्णाय मंगळं ।। ३
सनाथाSपि विनाथेव कृष्णा कृष्टा सभांतरे
यन्नाम कीर्तनात् त्राता तस्मै कृष्णाय मंगळं ।। ४

वन-पर्व

पार्थेभ्यो वनवासिभ्यो द्रोग्धुं दुर्योधनेरितः
निरस्तो येन दुर्वासाः तस्मै कृष्णाय मंगळं ।। ५





विराट-पर्व

अज्ञातवास निश्श्रीकाः पार्था यद्दत्त सम्पदा
सौभद्रोपयमं चक्रुः तस्मै कृष्णाय मंगळं ।। ६

उद्योग-पर्व

सौलभ्यपरिपूर्णाय परात्परतराय च
दूताय पांडुपुत्राणां सिद्धधर्माय मंगळं ।। ७

भीष्म-पर्व

सर्वशास्त्रमयीं गीतां यो ददौ बंधमुक्तये
पार्थव्याजेन नस्तस्मै पार्थसूताय मंगळं ।। ८
भीष्मबाणातिविद्धाय क्रुद्धायाप्लुत्य धावते
स्विन्नाय चक्रहस्ताय धूलिधूसरपक्ष्मणे ।। ९
स्रस्तपीताम्बर दशां कर्षतो भूतले मुहुः
परिष्टुताय भीष्मेण फुल्लपंकज चक्षुषे ।। १०
पार्थेन पुनरानीय स्थापिताय निजे रथे
घातयित्रेSथ भीष्मस्य मेघश्यामाय मंगळं ।। ११

द्रोण-पर्व

अतिश्रान्तान् पार्थरथ्यान् मध्याह्ने युद्धमध्यगान्
पश्यत्सु सर्ववीरेषु सरो निर्माप्य निर्मलं ।। १२

संस्नाप्य पाययित्वा च नीरुजानकरोत्तु यः
सर्वसंमोहकायाऽस्तु तस्मै कृष्णाय मंगळं ।। १३
पिधाय भानुं चक्रेण रात्रीकृत्य दिनं तु यः
अमारयत्सिन्धुराजं तस्मै कृष्णाय मंगळं ।। १४
घातिनीमेकवीरस्य शक्तिं संप्रार्थ्य वासवात्
लब्धां कर्णेन सुचिराद्रक्षितां हंतुमर्जुनं ।।१५
हैडिंबेये यातुधाने रात्रियुद्धे घटोत्कचे
पातयित्वाऽर्जुनं गोप्त्रे तस्मै कृष्णाय मंगळं ।। १६
प्रयुक्ते भगदत्तेन वैष्णवास्त्रेऽर्जुनं प्रति
यस्स्वोरसा दधाराशु तस्मै कृष्णाय मंगळं ।। १७
अश्वत्थामवधं द्रोणं श्रावयित्वा युधिष्ठिरात्
योऽघातयत्स्वाश्रितार्थे तस्मै कृष्णाय मंगळं ।। १८
नारायणास्त्राद्यो द्रौणि प्रयुक्तात्सर्वसैनिकान्
ररक्ष क्षिप्तसामग्रींस्तस्मै कृष्णाय मंगळं ।। १९
कर्ण-पर्व
कर्णबाणातिविद्धेन सुप्तेन शिबिरे स्वके
धर्मपुत्रेण गांडीवे निन्दिते धनुषि स्वके ।। २०
स्वप्रतिज्ञानुसारेण च्छेत्तुं यौधिष्ठिरं शिरः
उद्यतासिं तु विजयं सूक्ष्मधर्मोपदेशतः ।। २१





समाधायाग्रजस्याऽपि धिक्कारं स्वात्मनस्स्तुतिं
यः कारयित्वा ऽरक्षद्द्वौ तस्मै कृष्णाय मंगळं ।। २२
कर्णप्रयुक्ते सार्पेऽस्त्रे कंठमुद्दिश्य वासवेः
रथमाक्रम्य भारेण पातयित्वाऽथ जानुना ।। २३
वाहान् किरीटमात्रं यो हारयित्वा ररक्ष तं
समयोचित धीभूम्ने तस्मै कृष्णाय मंगळं ।। २४
रथचक्रं भुवा ग्रस्त मुद्धरंतं रवेस्सुतं
अनिच्छताऽपि पार्थेन घातयित्रेऽस्तु मंगळं ।। २५
शल्य-पर्व
बलक्षयाद् ह्रदे मग्नमुत्थाप्य तु सुयोधनं
मर्यादामप्यतिक्रम्य भीमेन गदया मृधे ।। २६
संज्ञाप्य भेदयामास यस्सुयोधनसक्थिनी
भीमसंधासमाधात्रे तस्मै कृष्णाय मंगळं ।। २७
अष्टादशेऽहनि रणे पूर्णे शिबिरमागते
सायं रथे पूर्वमेव योऽवतार्यार्जुनं ततः ।। २८
अवप्लुत्य रथात्तस्मात्साश्वाद्भस्मीकृतात् क्षणात्
ररक्षार्जुन मेकाग्र स्तस्मै कृष्णाय मंगळं ।। २९
सौप्तिक-पर्व
वराद्रुद्रस्य सर्वस्मिन्निशि सुप्ते बले हते

द्रौणिना निशि पंचानां रक्षकायाऽस्तु मंगळं ।। ३०

स्त्री-पर्व

भीमं निरस्य प्रणतमायसं तं निधाययः

ररक्ष भीमं जात्यंधात् तस्मै कृष्णाय मंगळं ।। ३१

शान्ति-पर्व

शरतल्पगताद्भीष्मादशक्तादपि शक्तिदः

योऽश्रावयत्सर्वधर्मांस्तस्मै कृष्णाय मंगळं ।। ३२

एकादशी व्रतं स्वस्य नाम्ना मपि सहस्रकं

अवाचयद्यो भीष्मेण तस्मै कृष्णाय मंगळं ।। ३३

आनुशासनिक-पर्व

द्रौणिब्रह्मास्त्रनिर्दग्ध मृतजातोत्तरासुतं

योऽजीवयत्पुनस्तस्मै सर्वशक्ताय मंगळं ।। ३४

आश्रमवासिक मौसल महाप्रस्थान स्वर्गारोहण-पर्वणि

सर्वभूभारनिर्हर्त्रे हित्वा स्वपरवेचनं

निरंकुशस्वतन्त्राय तस्मै कृष्णाय मंगळं ।। ३५

मंगळं सूरिसेव्याय श्रीभूनीलाविहारिणे

परस्मै वासुदेवाय नित्यानंदाय मंगळं ।। ३६





निगमनं

बालधन्विकुलोद्भूत शिंगरार्य तनूभुवा

यद्वद्रिनित्यवासेन वेंकटार्येण संभृतं ।। ३७

भारत प्रतिपर्वस्थ स्वकथा रसमेदुरं

मंगळं स्वादयित्रे च तस्मै कृष्णाय मंगळं ।। ३८

रामानुजार्यसेव्याय नित्यं यद्वद्रिवासिने

भक्तानुग्रहदीक्षाय संपत्पुत्राय मंगळं ।। ३९

**।।श्री भारतकृष्णमंगळं।।**

श्रीकृष्णाय नमः

मंडयं नायक रामानुजः